Roll No. ...................................

# D–3321

## B. A. (Classics) (Part I) EXAMINATION, 2020

**(Foundation Course)**

SANSKRIT LANGUAGE

*Time : Three Hours ]* *[ Maximum Marks : 75*

**सूचना** : सर्वे प्रश्नाः समाधेयाः।

1. (क) अधोलिखितेषु कयोश्चिद् **द्वयोः** व्याख्या विधेयाः— 20

(i) लभेत सिकतासु तैलमपि यत्नतः पीडयन्,
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितिः।
कदाचिदपि पर्यटञ्छशविषाणमासादयेत्,
न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥

(ii) शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो,
नागेन्द्रो निशिताङ्कुशेन समदौ दण्डेन गोगर्दभौ।
व्याधिर्भेषजसंग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषः,
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्॥





(iii) प्रारभ्यते न खलु विघ्नभयेन नीचैः,
प्रारभ्य विघ्नविहता विरमन्ति मध्याः।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः,
प्रारभ्य चोत्तमजना न परित्यजन्ति॥

(iv) सत्याऽनृता च परुषा प्रियवादिनी च,
हिंस्त्रा दयालुरपि चाऽर्थपरा बदान्या।
नित्यव्यया प्रचुरनित्यधनागमा च,
वेशाङ्गनेव नृपनीतिरनैकरूपा॥

(ख) निम्नाङ्कितेषु कस्यचिद् **एकस्य** अनुवादो विधेयः— 10

(i) पापान्निवारयति योजयते हिताय,
गुहयं निगूहति गुणान्प्रकटीकरोति।
आपद्गतं च न जहाति, ददाति काले,
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः॥

(ii) क्वचित् भूमौ शय्या क्वचिदपि च पर्यङ्कशयनः,
क्वचिच्छाकाहारी, क्वचिदपि च शाल्योदनरुचिः।
क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्बरधरो,
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम्॥

(iii) निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु,
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।
अद्यैव वा मरणमस्तु, युगान्तरे वा,
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः॥

2. आधुनिकजीवने नीतिशतकस्य उपयोगिता प्रतिपादनीया। 20

अथवा

नीतिकाव्येषु नीतिशतकस्य महत्त्वं प्रतिपादनीयम्।

3. (क) म्निांकितेषु केषाञ्चित् **पञ्चानां** संस्कृतभाषामनुवादो विधेयः— 10

(i) तू सत्य बोलता है।

(ii) सब बालक हँसते हैं।

(iii) मैं पाठशाला जाता हूँ।

(iv) उसे गेंद खेलना चाहिए।

(v) वह बालक की रक्षा करेगा।

(vi) उसने भोजन खाया।

(vii) वह पत्र लिखे।

(viii) पुत्र पिता को नमस्कार करता है।

(ix) तीन आदमी खाना खाते हैं।

(x) हम सब मनुष्य हैं।

(ख) निम्नाङ्कितेषु केषाञ्चित् **पञ्चानां** वाक्यशुद्धिर्विधेया— 10

(i) त्वं राजस्य रक्षसि।

(ii) युवां पुस्तकं पठसि।





(iii) अहम् अत्र स्थामि।

(iv) रामं ग्रामः गच्छन्ति।

(v) बालकौ विद्यालयं गच्छन्ति।

(vi) चत्वारः बालका आगच्छति।

(vii) भवान् आगच्छसि।

(viii) त्वम् असत्यं न वदतु।

(ix) स कन्याया अरक्षत्।

(x) अलं विवादस्य।

(ग) निम्नाङ्कितेषु केषाञ्चित् **पञ्चानां** चत्वारः पर्यायवाचिशब्दा लेखनीयाः— 5

(i) लक्ष्मी

(ii) हरिः

(iii) तेजः

(iv) वायुः

(v) मेघः

(vi) नीरः

(vii) गजः

(viii) मयूरः

(ix) शिवः

(x) पार्वती